aarsha

# वैराग्यशतकम्

## भर्तृहरि कृत

Edited

Asit Panja

www.ayurvedah.in

भर्तृहरि कृत

# वैराग्यशतकम्

(vairāgyaśatakam)

Edited by

asit k panja

aarsha

Plot no. 4, Khandelwal nagar Extn,
Near Premnagar pulia, Agra Road,
Jaipur- 302031, Rajasthan

www.ayurvedah.in

www.ayurvedah.in

**Publisher** : **aarsha**

**Edition** : **First; March 2015**

**ISBN** :

**Price** : **FREE**

Composing and editing: **Bapan Neogi**

Cover page: **Rajarshi**

For any information, feedback and requirement of this book, please mail to :

aarshaayurveda@gmail.com www.ayurvedah.in

Published by **Bapan Neogi** on behalf of **aarsha** ,

**aarsha**
**Plot no. 4, Khandelwal nagar Extn,**
**Near Premnagar pulia, Agra Road,**
**Jaipur- 302031, Rajasthan**

www.ayurvedah.in

# वैराग्यशतकम्

चूडोत्तंसितचन्द्रचारुकलिकाचञ्चच्छिखाभास्वरो

लीलादग्धविलोलकामशलभः श्रेयोदशाग्रे स्फुरन् ।

अन्तःस्फूर्जदपारमोहतिमिरप्राग्भारमुच्चाटयं-

श्वेतःसद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः ॥ १ ॥

भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किञ्चित्फलं

त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला ।

भुक्तं मानविवर्जितं परगृहेष्वाशङ्कया काकवत्-

तृष्णे जृम्भसि पापकर्मपिशुने नाद्यापि सन्तुष्यसि ॥ २ ॥

www.ayurvedah.in

उत्खातं निधिशङ्कया क्षितितलं ध्माता गिरेर्धातवो

निस्तीर्णः सरितां पतिर्नृपतयो यत्नेन सन्तोषिताः ।

मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशाः

प्राप्तः काणवराटकोऽपि न मया तृष्णे सकामा भव ॥३ ॥

खलालापाः सौढाः कथमपि तदाराधनपरै-

र्निगृह्यान्तर्बाष्पं हसितमपि शून्येन मनसा ।

कृतो वित्तस्तम्भप्रतिहतधियामञ्जलिरपि

त्वमाशे मोघाशे किमपरमतो नर्तयसि माम् ॥४ ॥

www.ayurvedah.in

अमीषां प्राणानां तुलितविसिनीपत्रपयसां

कृते किं नास्माभिर्विगलितविवेकैर्व्यवसितम् ।

यदाढ्यानामग्रे द्रविणमदनिःसंज्ञमनसां

कृतं मावव्रीडैर्निजगुणकथापातकमपि ॥५ ॥

क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न सन्तोषतः

सोढो दुःसहशीततापपवनक्लेशो न तप्तं तपः ।

ध्यातं वित्तमहर्निशं नित्यमितप्राणैर्न शम्भोः पदं

तत्तत्कर्म कृतं यदेव मुनिभिस्तैस्तैः फलैर्वञ्चिताः ॥६ ॥

भोगा न भुक्ता वयमेव भुक्ता-

स्तपो न तप्तं वयमेव तप्ताः ।

कालो न यातो वयमेव याता-

स्तृष्णा न जीर्णा वयमेव जीर्णाः ।७ ।।

बलिभिर्मुखमाक्रान्तं पलितेनाङ्कितं शिरः ।

गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥८ ॥

विवेकव्याकोशे विदधति समे शाम्यति तृषा

परिष्वङ्गे तुङ्गे प्रसरतितरां सा परिणता ।

जराजीर्णैश्वर्यग्रसनगहनाक्षेपकृपणस्तृषापात्रं

यस्यां भवति मरुतामप्यधिपतिः ॥८*१ ॥

www.ayurvedah.in

निवृत्ता भोगेच्छा पुरुषबहुमानोऽपि गलितः

समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः ।

शनैर्यष्ट्युत्थानं घनतिमिररुद्धे च नयने

अहो मूढः कायस्तदपि मरणापायचकितः ॥९ ॥

आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला

रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।

मोहावर्तसुदुस्तरातिगहना प्रोत्तुङ्गचिन्तातटी

तस्याः परगता विशुद्धमलसो नन्दन्ति योगीश्वराः । १० ।

न संसारोत्पन्नं चरितमनुपश्यामि कुशलं

विपाकः पुण्यानां जनयति भयं मे विमृशतः ।

महद्भिः पुण्यौघैश्चिरपरिगृहीताश्च विषया

महान्तो जायन्ते व्यसनमिव दातुं विषयिणाम् ॥११ ॥

अवश्यं यातारश्चिरतरमुषित्वापि विषया

वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् ।

व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः

स्वयं त्यक्ता ह्येते शमसुखमनन्तं विदधति ॥१२ ॥

www.ayurvedah.in

ब्रह्मज्ञानविवेकनिर्मलधियः कुर्वन्त्यहो दुष्करं

यन्मुञ्चन्त्युपभोगभाञ्ज्यपि धनान्येकान्ततो निःस्पृहाः ।

सम्प्रातान्न पुरा न सम्प्रति न च प्राप्तौ दृढप्रत्ययान्-

वाञ्छामात्रपरिग्रहानपि परं त्यक्तुं न शक्ता वयम् ॥१३ ॥

धन्यानां गिरिकन्द्रेषु वसतां ज्योतिः परं ध्यायता-

मानन्दाश्रुजलं पिबन्ति शकुना निःशङ्कमङ्केशयाः ।

अस्माकं तु मनोरथोपरचितप्रासादवापीतट-

क्रीडाकाननकेलिकौतुकजुषामायुः परं क्षीयते ॥१४ ॥

भिक्षाशतं तदपि नीरसमेकबारं

शय्या च भूः परिजनो निजदेहमात्रम् ।

वस्त्रं विशीर्णशतखण्डमयी च कन्था

हा हा तथापि विषया न परित्यजन्ति ॥१५ ॥

स्तनौ मांसग्रन्थी कनककलशावित्युपमिती

मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम् ।

स्रवन्मूत्रक्लिन्नं करिवरशिरस्पर्धि जघनं

मुहुर्निन्द्यं रूपं कविजनविशेषैर्गुरुकृतम् ॥१६ ॥

www.ayurvedah.in

एको रागिषु राजते प्रियतमादेहार्धहारी हरो

नीरागेषु जनो विमुक्तललनासङ्गो न यस्मात्परः ।

दुर्वारस्मरबाणपन्नगविषव्याबिद्धमुग्धो जनः

शेषः कामविडम्बितान्न विषयान्भोक्तुं न मोक्तुं क्षमः ॥१७ ॥

अजानन्दाहात्म्यं पततु शलभस्तीव्रदहने

स मीनोऽप्यज्ञानाद्बडिशयुतमश्नातु पिशितम् ।

विजानन्तोऽप्येते वयमिह वियज्जालजटिलान्

न मुञ्चामः कानामहह गहनो मोहमहिमा ॥१८ ॥

तृषा शुष्यत्यास्ये पिबति सलिलं शीतमधुरं

क्षुधार्तः शाल्यन्नं कवलयति मांसादिकलितम् ।

प्रदीप्ते कामाग्नौ सुदृढतरमालिङ्गति वधूं

प्रतीकारं व्याधः सुखमिति विपर्यस्यति जनः ॥१९ ॥

तुङ्गं वेश्म सुताः सतामभिमताः सङ्ख्यातिगाः सम्पदः

कल्याणी दयिता वयश्च नवमित्यज्ञानमूढो जनः ।

मत्वा विश्वमनश्वरं निविशते संसारकारागृहे

संदृश्य क्षणभङ्गुरं तदखिलं धन्यस्तु सन्न्यस्यति ॥२० ॥

www.ayurvedah.in

दीना दीनमुखैः सदैव शिशुकैराकृष्टजीर्णाम्बरा

क्रोशद्भिः क्षुधितैर्निरन्नविधुरा दृश्या न चेद्गेहिनी ।

याञ्चाभङ्गभयेन गद्गदगलत्त्रुट्यद्विलीनाक्षरं

को देहीति वदेत्स्वदग्धजठरस्यार्थे मनस्वी पुमान् ॥२१ ॥

अभिमतमहामानग्रन्थिप्रभेदपटीयसी

गुरुतरगुणग्रामाभोजस्फुटोज्ज्वलचन्द्रिका ।

विपुलविलल्लज्जावल्लीवितानकुठारिका

जठरपिठरी दुस्पुरेयं करोति विडम्बनम् ॥२२ ॥

पुण्ये ग्रामे वने वा महति सितपटच्छन्नपाली कपालिं

ह्यादाय न्यायगर्भद्विजहुतहुतभुग्धूमधूम्रोपकण्ठे ।

द्वारं द्वारं प्रविष्टो वरमुदरदरीपूरणाय क्षुधार्तो

मानी प्राणैः सनाथो न पुनरनुदिनं तुल्यकुल्येसु दीनः ।२३॥

गङ्गातरङ्गकणशीकरशीतलानि

विद्याधराध्युषितचारुशिलातलानि ।

स्थानानि किं हिमवतः प्रलयं गतानि

यत्सावमानपरपिण्डरता मनुष्याः ॥२४ ॥

www.ayurvedah.in

किं कन्दाः कन्दरेभ्यः प्रलयमुपगता निर्झरा वा गिरिभ्यः

प्रध्वस्ता वा तरुभ्यः सरसगलभृतो वल्कलिन्यश्च शाखाः ।

वीक्ष्यन्ते यन्मुखानि प्रसभमपगतप्रश्रयाणां खलानां

दुःखाप्तस्वल्पवित्तस्मयपवनवशानर्तितभ्रूलतानि ॥२५ ॥

पुण्यैर्मूलफलैस्तथा प्रणयिनीं वृत्तिं कुरुष्वाधुना

भूशय्यां नवपल्लवैरकृपणैरुत्तिष्ठ यावो वनं ।

क्षुद्राणामविवेकमूढमनसां यत्रेश्वराणां सदा

वित्तव्याधिविकारविह्वलगिरां नामापि न श्रूयते ॥२६ ॥

फलं स्वेच्छालभ्यं प्रतिवनमखेदं क्षितिरुहां

पयः स्थाने स्थाने शिशिरमधुरं पुण्यसरिताम् ।

मृदुस्पर्शा शय्या सुललितलतापल्लवमयी

सहन्ते सन्तापं तदपि धनिनां द्वारि कृपणाः ॥२७ ॥

ये वर्तन्ते धनपतिपुरः प्रार्थनादुःखभाजो

ये चाल्पत्वं दधति विषयाक्षेपपर्याप्तबुद्धेः ।

तेषामन्तःस्फुरितहसितं वासराणि स्मरेयं

ध्यानच्छेदे शिखरिकुहरग्रावशय्यानिषण्णः ॥२८ ॥

www.ayurvedah.in

ये सन्तोषनिरन्तरप्रमुदितस्तेषां न भिन्ना मुदो

ये त्वन्ये धनलुब्धसङ्कलधियस्तेसां न तृष्णाहता ।

इत्थं कस्य कृते कुतः स विधिना कीदृक्पदं सम्पदां

स्वात्मन्येव समाप्तहेममहिमा मेरुर्न मे रोचते ॥२९ ॥

भिक्षाहारमदैन्यमप्रतिसुखं भीतिच्छिदं सर्वतो

दुर्मात्सर्यमदाभिमानमथनं दुःखौघविध्वंसनम् ।

सर्वत्रान्वहमप्रयत्नसुलभं साधुप्रियं पावनं

शम्भोः सत्रमवायमक्षयनिधिं शंसन्ति योगीश्वराः ॥३० ॥

भोगे रोगमयं कुले च्युतिभयं वित्ते नृपालाद्भयं

मानेे धैन्यभयं बले रिपुभयं रूपे जराया भयम् ।

शास्त्रे वादिभयं गुणे खलभयं काये कृतान्ताद्भयं

सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम् ॥३१ ॥

आक्रान्तं मरणेन जन्म जरसा चात्युज्ज्वलं यौवनं

सन्तोषो धनलिप्सया शममुखं प्रौढाङ्गनाविभ्रमैः ।

लोकैर्मत्सरिभिर्गुणा वनभुवो व्यालैर्नृपा दुर्जनै-

रस्थैर्येण विभूतयोऽप्यपहता ग्रस्तं न किं केन वा ॥३२ ॥

www.ayurvedah.in

आधिव्याधिशतैर्जनस्य विविधैरारोग्यमुन्मूल्यते

लक्ष्मीर्यत्र पतन्ति तत्र विवृतद्वारा इव व्यापदः ।

जातं जातमवश्यमाशु विवशं मृत्युः करोत्यात्मसात्

तत्किं तेन निरङ्कुशेन विधिना यन्निर्मितं सुस्थिरम् ॥३३ ॥

भोगास्तुङ्गतरङ्गभङ्गतरलाः प्राणाः क्षणध्वंसिनः

स्तोकान्येव दिनानि यौवनसुखं स्फूर्तिः प्रियासु स्थिता ।

तत्संसारमसारमेव निखिलं बुद्ध्वा बुधा बोधका

लोकानुग्रहपेशलेन मनसा यत्नः समाधीयताम् ॥३४ ॥

भोगा मेघवितानमध्यविलसत्सौदामिनीचञ्चला

आयुर्वायुविघट्टिताब्जपटलीलीनाम्बुवद्भङ्गुरम् ।

लीला यौवनलालसास्तनुभृतामित्याकलय्य द्रुतं

योगे धैर्यसमाधिसिद्धिसुलभे बुद्धिं विदध्वं बुधाः ॥३५ ॥

आयुः कल्लोललोलं कतिपयदिवसस्थायिनी यौवनश्री-

रर्थाः सङ्कल्पकल्पा घनसमयतडिद्विभ्रमा भोगपूगाः ।

कण्ठाश्लेषोपगूढ तदपि च न चिरं यत्प्रियाभः प्रणीतं

ब्रह्मण्यासक्तचित्ता भवत भवमयाम्भोधिपारं तरीतुम् ।। ३६ ॥

www.ayurvedahi.in

कृच्छ्रेणामेध्यमध्ये नियमिततनुभिः स्थीयते गर्भवासे

कान्ताविश्लेषदुःखव्यतिकरविषमो यौवने चोपभोगः ।

वामाक्षीणामवज्ञाविहसितवसतिर्वृद्धभावोऽन्यसाधुः

संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किञ्चित् ॥ ३७ ॥

व्याघ्रीव तिष्ठति जरा परितर्जयन्ती

रोगाश्च शत्रव इव प्रहरन्ति देहम् ।

आयुः परिस्रवन्ति भिन्नघटादिवाम्भो

लोकस्तथाप्यहितमाचरतीति चित्रम् ॥ ३८ ॥

भोगा भङ्गुरवृत्तयो बहुविधास्तैरेव चायं भवस्तत्

कस्येह कृते परिभ्रमत रे लोकाः कृतं चेष्टितैः ।

आशापाशशतापशान्तिविशदं चेतःसमाधीयतां

कामोत्पत्तिवशात्स्वधामनि यदि श्रद्देयमस्मद्वचः ॥३९ ॥

सखे धन्याः केचित्त्रुटितभवबन्धव्यतिकरा

वनान्ते चित्तान्तर्विषमविषयाशीत्विषगताः ।

शरच्चन्द्रज्योत्स्नाधवलगगनाभोगसुभगां

नयन्ते ये रात्रिं सुकृतचयचिन्तैकशरणाः ॥३९*१ ॥

www.ayurvedah.in

ब्रह्मेन्द्रादिमरुद्गणांस्तृणकणान्यत्र स्थितो मन्यते

यत्स्वादाद्विरसा भवन्ति विभवास्त्रैलोक्यराज्यादयः ।

भोगः कोऽपि स एव एक परमो नित्योदितो जृम्भते

भोः साधो क्षणभङ्गुरे तदितरे भोगे रतिं मा कृथाः ॥४० ॥

सा रम्या नगरी महान्स नृपतिः सामन्तचक्रं च तत्

पार्श्वे तस्य च सा विदग्धपरिषत्ताश्चन्द्रबिम्बाननाः ।

उद्वृत्तः स राजपुत्रनिवहस्ते वन्दिनस्ताः कथाः

सर्वं यस्य वशादगात्स्मृतिपथं कालाय तस्मै नमः ॥४१ ॥

यत्रानेकः क्वचिदपि गृहे तत्र तिष्ठत्यथैको

यत्राप्येकस्तदनु बहवस्तत्र नैकोऽपि चान्ते ।

इत्थं नयौ रजनिदिवसौ लोलयन्द्वाविवाक्षौ

कालः कल्यो भुवनफलके क्रीडति प्राणिशारैः ॥४२ ॥

आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं

व्यापारैर्बहुकार्यभारगुरुभिः कालोऽपि न ज्ञायते ।

दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते

पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥४३ ॥

www.ayurvedah.in

रात्रिः सैव पुनः स एव दिवसो मत्वा मुधा जन्तवो

धावन्त्युद्यमिनस्तथैव निभृतप्रारब्धतत्तत्क्रियाः ।

व्यापारैः पुनरुक्तभूतविषयैरित्थं विधेनामुना

संसारेण कदर्थिता वयमहो मोहान्न लज्जामहे ॥४४ ॥

न ध्यानं पदमीश्वरस्य विधिवत्संसारविच्छित्तये

स्वर्गद्वारकपाटपाटनपटुर्धर्मोऽपि नोपार्जितः ।

नारीपीनपयोधरोरुयुगलं स्वप्नेऽपि नालिङ्गितं

मातुः केवल एव यौवनवनच्छेदे कुठारा वयम् ॥४५ ॥

नाभ्यस्ता प्रतिवादिवृन्ददमनी विद्या विनीतोचिता

खड्गाग्रैः करिकुम्भपीठदलनैर्नाकं न नीतं यशः ।

कान्ताकोमलपल्लवाधररसः पीतो न चन्द्रोदये

तारुण्यं गतमेव निष्फलमहो शून्यालये दीपवत् ॥४६ ॥

विद्या नाधिगता कलङ्करहिता वित्तं च नोपार्जितं

शुश्रूषापि समाहितेन मनसा पित्रोर्न सम्पादिता ।

आलोलायतलोचनाः प्रियतमाः स्वप्नेऽपि नालिङ्गिताः

कालोऽयं परपिण्डलोलुपतया काकैरिव प्रेर्यते ॥४७ ॥

www.ayurvedah.in

वयं येभ्यो जाताश्चिरपरिगता एव खलु ते

समं यैः संवृद्धाः स्मृतिविषयतां तेऽपि गमिताः ।

इदानीमेते स्मः प्रतिदिवसमासन्नपतना

गतास्तुल्यावस्थां सिकतिलनदीतीरतरुभिः ॥४८ ॥

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं

तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः ।

शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते

जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम् ॥४९ ॥

www.ayurvedah.in

क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः

क्षणं वित्तैर्हीनः क्षणमपि च सम्पूर्णविभवः ।

जराजीर्णैरङ्गैर्नट इव बलीमण्डिततनू-

र्नरः संसारान्ते विशति यमधानीयवनिकाम् ॥५० ॥

त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः

ख्यातस्त्वं विभवैर्यशांसि कवयो दिक्षु प्रतन्वन्ति नः ।

इत्थं मानधनातिदूरमुभयोरप्यावयोरन्तरं

यद्यस्मासु पराङ्मुखोऽसि वयमप्येकान्ततो निःस्पृहाः ॥५१॥

www.ayurvedah.in

अर्थानामीशिषे त्वं वयमपि च गिरामीश्महे यावदर्थं

शूरस्त्वं वादिदर्पव्युपशमनविधावक्षयं पाटवं नः ।

सेवन्ते त्वां धनाढ्या मतिमलहतयेमामपि श्रोतुकामा-

मय्यप्यास्था न ते चेत्त्वयि मम नितरामेव राजन्ननास्था ॥५२ ॥

वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः

सम इह परितोषो निर्विशेषो विशेषः ।

स तु भवतु दरिद्रो यस्य तृष्णा विशाला

मनसि च परितुष्टे कोऽर्थवान्को दरिद्रः ॥५३ ॥

फलमलमशनाय स्वादु पानाय तोयं

क्षितिरपि शयनार्थं वाससे वल्कलं च ।

नवघनमधुपानभ्रान्तसर्वेन्द्रियाणा-

मविनयमनुमन्तुं नोत्सहे दुर्जनानाम् ॥५४ ॥

अश्नीमहि वयं भिक्षामाशावासो वसीमहि ।

शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ॥५५ ॥

न नटा ना विटा न गायका

न च सभ्येतरवादचुञ्चवः ।

नृपमीक्षितुमत्र के वयं

स्तनभारानमिता न योषितः ॥५६ ॥

www.ayurvedah.in

विपुलहृदयैरीशैरेतज्जगज्जनितं पुरा

विधृतमपरैर्दत्तं चान्यैर्विजित्य तृणं यथा ।

इह हि भुवनान्यन्यैर्धीराश्चतुर्दश भुञ्जते

कतिपयपुरस्वाम्ये पुंसां क एष मदज्वरः ॥५७ ॥

अभुक्तायां यस्यां क्षणमपि न यातं नृपशतै-

र्ध्रुवस्तस्या लाभे क इव बहुमानः क्षितिभृताम् ।

तदंशस्याप्यंशे तदवयलेशेऽपि पतयो

विषादे कर्तव्ये विदधति जडाः प्रत्युत मुदं ॥५८ ॥

मृत्पिण्डो जलरेखया बलयतिः सर्वोऽप्ययं नन्वणुः

स्वांशीकृत्य स एव सङ्गरशतै राज्ञां गणा भुञ्जते ।

ये दद्युर्ददतोऽथवा किमपरं क्षुद्रा दरिद्रं भृशं

धिग्धिक्तान्पुरुषाधमान्धनकणान्वाञ्छन्ति तेभ्योऽपि ये ॥५९ ॥

स जातः कोऽप्यासीन्मदनरिपुणा मूर्ध्नि धवलं

कपालं यस्योच्चैर्विनिहितमलङ्कारविधये ।

नृभिः प्राणत्राणप्रवणमतिभिः कैश्चिदधुना

नमद्भिः कः पुंसामयमतुलदर्पज्वरभरः ॥६० ॥

www.ayurvedahi.in

परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा

प्रसादं किं नेतुं विशसि हृदय क्लेशकलितम् ।

प्रसन्ने त्वय्यन्तःसवयमुदितचिन्तामणिगणो

विविक्तः सङ्कल्पः किमभिलषितं पुष्यति न ते ॥६१ ॥

सत्यामेव त्रिलोकीसरिति हरशिरश्चुम्बिनीवच्छटायां

सद्वृत्तिं कल्पयन्त्यां बटविटपभवैर्वल्कलैः सत्फलैश्च ।

कोऽयं विद्वान्विपत्तिज्वरजनितरुजातीवदुःखासिकानां

वक्त्रं वीक्षेत दुःस्थे यदि हि न विभृयात्स्वे कुटुम्बेऽनुकम्पाम् ॥

६१*१ ॥

परिभ्रमसि किं मुधा क्वचन चित्त विश्राम्यतां

स्वयं भवति यद्यथा भवति तत्तथा नान्यथा ।

अतीतमननुस्मरन्नपि च भाव्यसङ्कल्पय-

न्नतर्कितसमागमानुभवामि भोगनाहं ॥६२ ॥

एतस्माद्विरमेन्द्रियार्थगहनादायासकादाश्रयश्रेयो

मार्गमशेषदुःखशमनव्यापारदक्षं क्षणात् ।

स्वात्मीभावमुपैहि सन्त्यज निजां कल्लोललोलं गतिं

मा भूयो भज भङ्गुरां भवरतिं चेतः प्रसीदाधुना ॥६३ ॥

मोहं मार्जय तामपार्जय रतिं चन्द्रार्धचूडामणौ

चेतः स्वर्गतरङ्गिणीतटभुवामासङ्गमङ्गीकुरु ।

www.ayurvedah.in

को वा वीचिषु बुद्बुदेषु च तडिल्लेखासु च श्रीषु च

ज्वालाग्रेषु च पन्नगेषु सरिद्वेगेषु च चप्रत्ययः ॥६४ ॥

चेतश्चिन्तय मा रमां सकृदिमामस्थायिनीमास्थया

भूपालभ्रुकुटीकुटीविहरणव्यापारपण्याङ्गनाम् ।

कन्थाकञ्चुकिनः प्रविश्य भवनद्वाराणि वाराणसीरथ्या

पङ्क्तिषु पाणिपात्रपतितां भिक्षामपेक्षामहे ॥६५ ॥

अग्रे गीतं सरसकवयः पार्श्वयोर्दाक्षिणात्याः

पश्चाल्लीलावलयरणितं चामरग्राहिणीनाम् ।

यद्यस्त्येवं कुरु भवरसास्वादने लम्पटत्वं

नो चेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ ॥६६ ॥

प्राप्ताः श्रियः सकलकामदुधास्ततः किं

न्यस्तं पदं शिरसि विद्विषतां ततः किम् ।

सम्पादिताः प्रणयिनो विभवैस्ततः किं

कल्पं स्थितास्तनुभृतां तनवस्ततः किम् ॥६७ ॥

भक्तिर्भवे मरणजन्मभयं हृदिस्थं

स्नेहो न बन्धुषु न मन्मथजा विकाराः ।

संसर्ज दोषरहिता विजया वनान्ता

वैराग्यमस्ति किमितः परमर्थनीयम् ॥६८ ॥

तस्मादनन्तमजरं परमं विकासि

तद्ब्रह्म चिन्तय किमेभिरसद्विकल्पैः ।

www.ayurvedah.in

यस्यानुषङ्गिण इमे भुवनाधिपत्य-

भोगादयः कृपणलोकमता भवन्ति ॥६९ ॥

पातालमाविशसि यासि नभो विलङ्घ्य

दिङ्मण्डलं भ्रमसि मानस चापलेन ।

भ्रान्त्यापि जातु विमलं कथमात्मनीनं

न ब्रह्म संसरसि विर्वृतिममेषि येन ॥७० ॥

किं वेदैः स्मृतिभिः पुराणपठनैः शास्त्रैर्महाविस्तरैः

स्वर्गग्रामकुटीनिवासफलदैः कर्मक्रियाविभ्रमैः ।

मुक्त्वैकं भवदुःखभाररचनाविध्वंसकालानलं

स्वात्मानन्दपदप्रवेशकलनं शेसैर्वाणिग्वृत्तिभिः ॥७१ ॥

नायं ते समयो रहस्यमधुना निद्राति नाथो यदि

स्थित्वा द्रक्ष्यति कुप्यति प्रभुरिति द्वारेषु येषां वचः ।

चेतस्तानपहाय याहि भवनं देवस्य विश्वेशितुर्

निर्दौवारिकनिर्दयोक्त्यपरुषं निःसोऽशर्मप्रदम् ॥७१*१ ॥

यतो मेरुः श्रीमान्निपतति युगान्ताग्निवलितः

समुद्राः शुष्यन्ति प्रचुरमकरग्राहनिलयाः ।

धरा गच्छत्यन्तं धरणिधरपादैरपि धृता

शरीरे का वार्ता करिकलभकर्णाग्रचपले ॥७२ ॥

www.ayurvedah.in

गात्रं सङ्कुचितं गतिर्विगलिता भ्रष्टा च दन्तावलिर्

दृष्टिर्नक्ष्यति वर्धते बधिरता वक्त्रं च लालायते ।

वाक्यं नाद्रियते च बान्धवजनो भार्या न शुश्रूषते

हा कष्टं पुरुषस्य जीर्णवयसः पुत्रोऽप्यमित्रायते ॥७३ ॥

वर्णं सितं शिरसि वीक्ष्य शिरोरुहाणां

स्थानं जरापरिभवस्य तदा पुमांसम् ।

आरोपितांस्थिशतकं परिहृत्य यान्ति

चण्डालकूपमिव दूरतरं तरुण्यः ॥७४ ॥

यावत्स्वस्थमिदं शरीरमरुजं यावच्च दूरे जरा

यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ।

आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्

सन्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥७५ ॥

तपस्यन्तः सन्तः किमधिनिवसामः सुरनदीं

गुणोदारान्दारानुत परिचरामः सविनयम् ।

पिबामः शास्त्रौघानुतविविधकाव्यामृतरसान्

न विद्मः किं कुर्मः कतिपयनिमेषायुषि जने ॥७६ ॥

www.ayurvedah.in

दुराराध्याश्चामी तुरगचलचित्ताः क्षितिभुजो

वयं तु स्थूलेच्छाः सुमहति फले बद्धमनसः ।

जरा देहं मृत्युर्हरति दयितं जीवितमिदं

सखे नान्यच्छ्रेयो जगति विदुषेऽन्यत्र तपसः ॥७७ ॥

माने म्लायिनि खण्डिते च वसुनि व्यर्थे प्रयातेऽर्थिनि

क्षीणे बन्धुजने गते परिजने नष्टे शनैर्यौवने ।

युक्तं केवलमेतदेव सुधियां यज्जह्नुकन्यापयः

पूताग्रावगिरीन्द्रकन्दरतटीकुञ्जे निवासः क्वचित् ॥७८ ॥

रम्याश्चन्द्रमरीचयस्तृणवती रम्या वनान्तस्थली

रम्यं साधुसमागमागतसुखं काव्येषु रम्याः कथाः ।

कोपोपाहितबाष्पबिन्दुतरलं रम्यं प्रियाया मुखं

सर्वं रम्यमनित्यतामुपगते चित्ते न किञ्चित्पुनः ॥७९ ॥

रम्यं हर्म्यतलं न किं वसतये श्रव्यं न गेयादिकं

किं वा प्राणसमासमागमसुखं नैवाधिकप्रीतये ।

किन्तु भ्रान्तपतङ्गक्षपवनव्यालोलदीपाङ्कुरच्छाया

चञ्चलमाकलय्य सकलं सन्तो वनान्तं गताः ॥८० ॥

www.ayurvedah.in

आसंसारात्त्रिभुवनमिदं चिन्वतां तात्तादृ-

ङ्नैवास्माकं नयनपदवीं श्रोत्रमार्गं गतो वा ।

योऽयं धत्ते विषयकरिणो गाढगूढाभिमान-

क्षीवस्यान्तः करणकरिणः संयमालानलीलाम् ॥८१ ॥

यदेतत्स्वच्छन्दं विहरणमकार्पण्यमशनं

सहार्यैः संवासः श्रुतमुपशमैकव्रतफलम् ।

मनो मन्दस्पन्दं बहिरपि चिरस्यापि विमृश-

न्न जाने कस्यैषा परिणतिरुदारस्य तपसः ॥८२ ॥

जीर्णा एव मनोरथाश्च हृदये यातं च तद्यौवनं

हन्ताङ्गेषु गुणाश्च वन्ध्यफलतां याता गुणज्ञैर्विना ।

किं युक्तं सहसाभ्युपैति बलवान्कालः कृतान्तोऽक्षमी

हा ज्ञातं मदनान्तकाङ्घ्रियुगलं मुक्त्वास्ति नान्यो गतिः ॥८३ ॥

महेश्वरे वा जगतामधीश्वरे

जनार्दने वा जगदन्तरात्मनि ।

न वस्तुभेदप्रतिपत्तिरस्ति मे

तथापि भक्तिस्तरुणेन्दुशेखरे ॥८४ ॥

स्फुरत्स्फारज्योत्स्नाधवलिततले क्वापि पुलिने

सुखासीनाः शान्तध्वन्तिसु रजनीषु द्युसरितः ।

www.ayurvedah.in

भवाभोगोद्विग्नाः शिव शिव शिवेत्युच्चवचसः

कदा यास्यामोऽतर्गतबहुलबाष्पाकुलदशाम्  ॥८५  ॥

महादेवो देवः सरिदपि च सैषा सुरसरिद्गुहा

एवागारं वसनमपि ता एव हरितः  ।

सुहृदा कालोऽयं व्रतमिदमदैन्यव्रतमिदं

कियद्वा वक्ष्यामो वटविटप एवास्तु दयिता   ॥ ८५ ॥

वितीर्णे सर्वस्वे तरुणकरुणापूर्णहृदयाः

स्मरन्तः संसारे विगुणपरिणामां विधिगतिम्  ।

वयं पुण्यारण्ये परिणतशरच्चन्द्रकिरणा-

स्त्रियामा नेष्यामो हरचरणचिन्तैकशरणाः   ॥८६  ॥

कदा वाराणस्याममरतटिनीरोधसि वस-

न्वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम् ।

अये गौरीनाथ त्रिपुरहर शम्भो त्रिनयन

प्रसीदेत्याक्रोशन्निमिषमिव नेष्यामि दिवसान् ॥८७ ॥

उद्यानेषु विचित्रभोजनविधिस्तीव्रातितीव्रं तपः

कौपीनावरणं सुवस्त्रममितं भिक्षाटनं मण्डनम् ।

आसन्नं मरणं च मङ्गलसमं यस्यां समुत्पद्यते

तां काशीं परिहृत्य हन्त विबुधैरन्यत्र किं स्थीयते ॥ ८७*१ ॥

स्नात्वा गाङ्गैः पयोभिः शुचिकुसुमफलैरर्चयित्वा विभोत्वां

ध्येये ध्यानं निवेश्य क्षितिधरकुहरग्रावपर्यङ्कमूले ।

www.ayurvedah.in

आत्मारामः फलाशी गुरुवचनरतस्त्वत्प्रसादात्स्मरारे

दुःखं मोक्ष्ये कदाहं समकरचरणे पुंसि सेवासमुत्थं ॥८८ ॥

एकाकी निःस्पृहः शान्तः पाणिपात्रो दिगम्बरः ।

कदा शम्भो भविष्यामि कर्मनिर्मूलनक्षमः ॥८९ ॥

पाणिं पात्रयतां निसर्गशुचिना भैक्षेण सन्तुष्यतां

यत्र क्वापि निषीदतां बहुतृणं विश्वं मुहुः पश्यतां ।

अत्यागेऽपि तनोरखण्डपरमानन्दावबोधस्पृशा

मध्वा कोऽपि शिवप्रसादसुलभः सम्पत्स्यते योगिनां ॥९० ॥

कौपीनं शतखण्डजर्जरतरं कन्था पुनस्तादृशी

नैश्चिन्त्यं निरपेक्षभैक्ष्यमशनं निद्रा श्मशाने वने ।

स्वातन्त्र्येण निरङ्कुशं विहरणं स्वान्तं प्रशान्तं सदा

स्थैर्यं योगमहोत्सवेऽपि च यदि त्रैलोक्यराज्येन किं ॥९१ ॥

ब्रह्माण्डं मण्डलीमात्रं किं लोभाय मनस्विनः ।

शफरीस्फुर्तेनाब्धिः क्षुब्धो न खलु जायते ॥९२ ॥

मातर्लक्ष्मि भजस्व कञ्चिदपरं मत्काङ्क्षिणी मा स्म भू-

र्भोगेषु स्पृहयालवस्तव वशे का निःस्पृहाणामसि ।

सद्यः स्यूतपलाशपत्रपुटिकापात्रैः पवित्रीकृतै-

र्भिक्षावस्तुभिरेव सम्प्रति वयं वृत्तिं समीहामहे ॥९३ ॥

www.ayurvedah.in

महाशय्या पृथ्वी विपुलमुपधानं भुजलतां

वितानं चाकाशं व्यजनमनुकूलोऽयमनिलः ।

शरच्चन्द्रो दीपो विरतिवनितासङ्गमुदितः

सुखी शान्तः शेते मुनिरतनुभूतिर्नृप इव ॥९४ ॥

भिक्षासी जनमध्यसङ्गरहितः स्वायत्तचेष्टः सदा

हानादानविरक्तमार्गनिरतः कश्चित्तपस्वी स्थितः ।

रथ्याकीर्णविशीर्णजीर्णवसनः सम्प्राप्तकन्थासनो

निर्मानो निरहङ्कृतिः शमसुखाभोगैकबद्धस्पृहः ॥९५ ॥

चण्डालः किमयं द्विजातिरथवा शूद्रोऽथ किं तापसः

किं वा तत्त्वविवेकपेशलमतिर्योगीश्वरः कोऽपि किम् ।

इत्युत्पन्नविकल्पजल्पमुखरैराभाष्यमाणा जनै-

र्न क्रुद्धाः पथि नैव तुष्टमनसो यान्ति स्वयं योगिनः ॥९६ ॥

हिंसाशून्यमयत्नलभ्यमशनं धात्रा मरुत्कल्पितं

व्यालानं पशवस्तृणाङ्कुरभुजस्तुष्टाः स्थलीशायिनः ।

संसारार्णवलङ्घनक्षमधियां वृत्तिः कृता सा नृणां

तामन्वेषयतां प्रयान्ति सततं सर्वं समाप्तिं गुणाः ॥९७ ॥

www.ayurvedah.in

गङ्गातीरे हिमगिरिशिलाबद्धपद्मासनस्य

ब्रह्मध्यानाभ्यसनविधिना योगनिद्रां गतस्य ।

किं तैर्भाव्यं मम सुदिवसैर्यत्र ते निर्विशङ्काः

कण्डूयन्ते जरठहरिणाः स्वाङ्गमङ्गे मदीये ॥९८ ॥

जीर्णाः कन्था ततः किं सितममलपटं पट्टसूत्रं ततः किं

एका भार्या ततः किं हयकरिसुगणैरावृतो वा ततः किम् ।

भक्तं भुक्तं ततः किं कदशनमथवा वासरान्ते ततः किं

व्यक्तज्योतिर्न वान्तर्मथितभवभयं वैभवं वा ततः किम् ॥ ९८*१ ॥

पाणिः पात्रं पवित्रं भ्रमणपरिगतं भैक्ष्यमक्षय्यमन्नं

विस्तीर्णं वस्त्रमाशादशकमचपलं तल्पमस्वल्पमुर्वी ।

येषां निःसङ्गताङ्गीकरणपरिणतस्वान्तसन्तोषिणस्ते

धन्याः संन्यस्तदैन्यव्यतिकरनिकराः कर्म निर्मूलयन्ति ॥९९ ॥

त्रैलोक्याधिपतित्वमेव विरसं यस्मिन्महाशासने

तल्लब्ध्वासनवस्त्रमानघटने भोगे रतिं मा कृथाः ।

भोगः कोऽपि स एक एव परमो नित्योदिता जृम्भने

यत्स्वादाद्विरसा भवन्ति विसयास्त्रैलोक्यराज्यादयः ॥९९*१ ॥

www.ayurvedah.in

मातर्मेदिनि तात मारुति सखे तेजः सुबन्धो जल

भ्रातर्व्योम निबद्ध एष भवतामन्त्यः प्रणामाञ्जलिः ।

युष्मत्सङ्गवशोपजातसुकृतस्फारस्फुरन्निर्मल-

ज्ञानापास्त समस्तमोहमहिमा लीने परब्रह्मणि ॥१०० ॥

शय्या शैलशिलागृहं गिरिगुहा वस्त्रं तरुणां त्वचः

सारङ्गाः सुहृदो ननु क्षितिरुहां वृत्तिः फलैः कोमलैः ।

येसां निर्झरमम्बुपानमुचितं रत्यै तु विद्याङ्गना

मन्ये ते परमेश्वराः शिरसि यरि बद्धो न सेवाञ्जलिः ॥१००*१॥

www.ayurvedah.in

धैर्यं यस्य पिता क्षमा च जननी शान्तिश्चिरं गेहिनी

सत्यं मित्रमिदं दया च भगिनी भ्राता मनःसंयमः ।

शय्या भूमितलं दिशोऽपि वसनं ज्ञानामृतं भोजनं

ह्येते यस्य कुटुम्बिनो वद सखे कस्माद्भयं योगिनः ॥१००*२॥

अहो वा हारे वा बलवति रिपौ वा सुहृदि वा

मणौ वा लोष्ठे वा कुसुमशयने वा दृषदि वा ।

तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः

क्वचित्पुण्यारण्ये शिव शिव शिवेति प्रलपतः ॥१००*३ ॥

www.ayurvedah.in

**e-publication of www.ayurveda.in .**
**Online FREE in pdf format**

1. **Āyurveda books**
    a. Astanga Hridayam
    b. Astanga Samgraha
    c. Charaka Samhita
    d. Madhava nidanam
    e. Sarangadhara Samhita
    f. Sushruta Samhita
2. **Contemporary books**
    a. Agastiya Ratnapariksa
    b. Amarakosa
    c. Ashtadhyayi
    d. Garbhopanisat
    e. Gheranda Samhita
    f. Goraksa Shataka
    g. Hatyoga pradipika
    h. Kamasutra
3. **Other books**
    a. **Puranas**
    b. **upanishadas**

www.ayurvedah.in

**Other publications (Hard copy) Published or Marketed by aarsha, Jaipur and available on www.ayurveda.in**

1. Tatvabodha Commentary (of Sivadas Sen) on Astanga hridaya **Rs 300/-**
2. Bhanumati Commentary (of Chakrapani dutta)on Sushruta Samhita **Rs 150/-**
3. Charakatatvapradipika Commentary (of Sivadas Sen) on Charaka Samhita **Rs 300/-**
4. Charakopaskara commentary (of Sivadas Sen) on Charaka Samhita **Rs 300/-**
5. Chanda in Ayurveda Samhita :student edition **Rs 175** ( original price Rs 300)
6. madhavaniadna Avavodha 2 :student edition **Rs 300** ( original price Rs 495)
7. madhavanidana Anusthana I :student edition **Rs 600** ( original price Rs 1095)
8. madhavanidana Anusthana II :student edition **Rs 700** ( original price Rs 1195)
9. Madhavanidana patha :student edition **Rs 500** ( original price Rs 895)

**aarsha, jaipur**

**Plot no. 4, Khandelwal nagar Extn,**
**Near Premnagar pulia, Agra Road,**
**Jaipur- 302031, Rajasthan**

www.ayurvedah.in